# Mantrapushpa

# મન્ત્રપુષ્પમ્

## Document Information

Text title : mantrapushhpaM

File name : mantrapushpa.itx

Category : veda, svara, mantra

Location : doc_veda

Author : Vedic Tradition

Transliterated by : Rajagopal Iyer (rajsand at yahoo.com)

Proofread by : Rajagopal Iyer (rajsand at yahoo.com)

Latest update : June 14, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# મન્ત્રપુષ્પમ્

ૐ

યોઽપાં પુષ્પં વેદ। પુષ્પવાન્ પ્રજાવાન્ પશુમાન્ ભવતિ ।
ચન્દ્રમા વા અપાં પુષ્પમ્। પુષ્પવાન્ પ્રજાવાન્ પશુમાન્ ભવતિ ।
ય એવં વેદ । યોઽપામાયતનં વેદ । આયતનવાન્ ભવતિ ॥ ૧॥

અગ્નિર્વા અપામાયતનમ્। આયતનવાન્ ભવતિ ।
યોઽગ્નેરાયતનં વેદ । આયતનવાન્ ભવતિ ।
આપો વા અગ્નેરાયતનમ્ । આયતનવાન્ ભવતિ ।
ય એવં વેદ । યોઽપામાયતનં વેદ । આયતનવાન્ ભવતિ ॥ ૨॥

વાયુર્વા અપામાયતનમ્। આયતનવાન્ ભવતિ ।
યો વાયોરાયતનં વેદ । આયતનવાન્ ભવતિ ।
આપો વૈ વાયોરાયતનમ્। આયતનવાન્ ભવતિ ।
ય એવં વેદ । યોઽપામાયતનં વેદ । આયતનવાન્ ભવતિ ॥ ૩॥

અસૌ વૈ તપન્નપામાયતનમ્। આયતનવાન્ ભવતિ ।
યોઽમુષ્ય તપત આયતનં વેદ । આયતનવાન્ ભવતિ ।
આપો વા અમુષ્ય તપત આયતનમ્। આયતનવાન્ ભવતિ ।
ય એવં વેદ । યોઽપામાયતનં વેદ । આયતનવાન્ ભવતિ ॥ ૪॥

ચન્દ્રમા વા અપામાયતનમ્ । આયતનવાન્ ભવતિ ।
યશ્ચન્દ્રમસ આયતનં વેદ । આયતનવાન્ ભવતિ ।
આપો વૈ ચન્દ્રમસ આયતનમ્। આયતનવાન્ ભવતિ ।
ય એવં વેદ । યોઽપામાયતનં વેદ । આયતનવાન્ ભવતિ ॥ ૫॥

નક્ષત્રાણિ વા અપામાયતનમ્। આયતનવાન્ ભવતિ ।

યો નક્ષત્રાણામાયતનં વેદ। આયતનવાન્ ભવતિ ।
આપો વૈ નક્ષત્રાણામાયતનમ્। આયતનવાન્ ભવતિ ।
ય એવં વેદ । યોऽપામાયતનં વેદ । આયતનવાન્ ભવતિ ॥ ૬॥

પર્જન્યો વા અપામાયતનમ્। આયતનવાન્ ભવતિ ।
યઃ પર્જન્યસ્યાયતનં વેદ । આયતનવાન્ ભવતિ ।
આપો વૈ પર્જન્યસ્યાऽऽયતનમ્। આયતનવાન્ ભવતિ ।
ય એવં વેદ । યોऽપામાયતનં વેદ । આયતનવાન્ ભવતિ ॥ ૭॥

સંવત્સરો વા અપામાયતનમ્। આયતનવાન્ ભવતિ ।
યસ્સંવત્સરસ્યાયતનં વેદ । આયતનવાન્ ભવતિ ।
આપો વૈ સંવત્સરસ્યાયતનમ્ । આયતનવાન્ ભવતિ ।
ય એવં વેદ। યોऽપ્સુ નાવં પ્રતિષ્ઠિતાં વેદ । પ્રત્યેવ તિષ્ઠતિ ॥ ૮॥

Encoded with Accents by Rajagopal Iyer rajsand@yahoo.com

---

*Mantrapushpa*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*